# **श्री गुरुचरणकमलेभ्यो नमः**

श्रावण मास साधना: July 2020

1) सौभाग्य गौरी साधना:

मंत्र: || ॐ सौभाग्य गौरी महादेवायै नमः||

विधान:- साधक या साधिकाये ,सुबह मे सफेद वस्त्र धारण कर पूर्व दिशा के ओर बैठे और सामने गुरु चित्र और शिवलिंग लगाकर पंचोपचार का पूजन कर साधना आरंभ करे | स्त्री/पुरुष कोई भी विवाह हेतु 21 माला करे,सौभाग्य वृद्धि हेतु 5 माला करे | श्रावण मास के हर शुक्रवर को करे|

सामाग्री :- रुद्राक्ष माला

जप संख्या: विवाह हेतु 21 माला करे,सौभाग्य वृद्धि हेतु 5 माला

2) महामृत्युंजय मंत्र:

मंत्र: || ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम |
उर्वारूकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ||

विधान:- साधक या साधिकाये , सफेद वस्त्र धारण कर पूर्व दिशा के ओर बैठे और सामने गुरु चित्र और शिवलिंग लगाकर पंचोपचार का पूजन कर साधना आरंभ करे |


श्रावण  मास के हर दिन एक माला करे|

सामाग्री :- रुद्राक्ष माला

जप संख्या: 1 माला

3) <u>अमोघ सिद्दि शिव कवच स्तोत्र:</u>

विधान:- साधक या साधिकाये , सफेद वस्त्र धारण कर पूर्व दिशा के ओर बैठे और  सामने  गुरु चित्र और शिवलिंग लगाकर पंचोपचार का पूजन कर साधना आरंभ करे | श्रावण  मास के हर सोमवार को एक बार पाठ करे|



अमोघ सिद्धि शिव कवच स्तोत्र

नमस्कृत्वा महादेवं विश्वव्यापिनमीश्वरम् ।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणां ।।
शुचौ देशे समासोनो यथावत्कल्पितासनः ।
जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ।।

हृत्पुण्डरीकान्तर-सन्निविष्टं स्वतेजसा व्याप्त-नभोऽवकाशं ।
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्यायेत् परानन्दमयं महेशं ॥
ध्यानावधूताखिल-कर्मबन्धश्चिरं चिदानन्द-निमग्न-चेताः ।
षडक्षर-न्यास-समा-हितात्मा शैवेन कुर्यात् कवचेन-रक्षां ॥
मां पातु देवोऽखिल-देवतात्मा संसार कूपे पतित गभीरे ।
तन्नाम दिव्यं वरमन्त्र मूलं धुनोतु मे सर्वमघहृदिस्थं ॥
सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मया-नन्दघन-श्चिदात्मा ।
अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयाद-शेषात् ॥
यो भू स्वरूपेण विभात विश्वं पायात् स भूमे-गिरीशोऽष्टमूर्तिः ।
योऽपां स्वरूपेण नृणां करोति सञ्जीवन सोऽवतु मां जलेभ्यः ॥
कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ।
स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादि-भीतेरखिलाच्च तापात् ॥
प्रदीप्त विद्युत् कनकावभासो विद्यावराभीति-कुठार-पाणिः ।
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्रं ॥
कुठार-खेटांकुश-पाश-शूल-कपाल-ढक्काक्ष-गुणान् दधानः ।
चतुर्मुखो नीलरुचि-स्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्यां ॥
कुन्देन्दु-शंख-स्फटिकावभासो वेदाक्ष माला वरदाभयांकः ।
त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोऽवतु मां प्रतीच्यां ॥
वराक्ष-मालाभय-टंक-हस्तः सरोज-किञ्जल्क-समानवर्णः ।
त्रिलोचनश्चारु-चतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥
वेदाभयेष्टांकुश-पाश टंक-कपाल-ढक्काक्षक-शूलपाणिः ।
सित-द्युतिः पंचमुखोऽवतान्मामीशान ऊर्ध्वं परम-प्रकाशः ॥
मूर्द्धानमव्यान् मम चन्द्रमौलिर्भालं ममाव्यादथ भालनेत्रः ।
नेत्रे ममाव्याद् भगनेत्र हारी नासां सदा रक्षतु विश्वनाथः ॥
पायाच्छ्रुती में श्रुति-गीत-कीर्तिः कपोल-मव्यात सततं कपाली ।
वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥
कण्ठ गिरीशोऽवतु नीलकण्ठः पाणिद्वयं पातु पिनाक-पाणिः ।
दोर्मूलमव्यान्मम धर्मबाहुर्वक्षस्थलं दक्षमखान्तकोऽव्यात् ॥
ममोदरं पातु गिरीन्द्र-धन्वा मध्यं ममाव्यान्मद-नान्तकारी ।
हेरम्ब-तातो मम पातु नाभिं पायात् कटिं धूर्जटिरीश्वरो मे ॥
ऊरु-द्वयं पातु कुबेर-मित्रो जानु-द्वयं मे जगदीश्वरोऽव्यात् ।
जंघ-युगंपु ङ्गव-केतुरव्यात् पादो ममाव्यात् सुरवन्द्य-पादः ॥
महेश्वरः पातु दिनादि-यामे मां मध्य-यामेऽवतु वामदेवः ।
त्रियम्बकः पातु तृतीय-यामे वृषध्वजः पातु दिनान्त्य-यामे ॥

( शेष भाग पृष्ठ संख्या ३९ पर देखें )

पायान्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु
मां निशीथे ।
गौरीपतिः पातु निशावसाने मृत्युञ्जयो रक्षतु
सर्वकालम् ।।
अन्तःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु
बहि स्थितं माम् ।
तदनन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां
समन्तात् ।।
तिष्ठन्तमव्याद् भुवनैकनाथाः पायाद व्रजन्तं
प्रथमाधिनाथः ।
वेदान्त-वेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः
शयानम् ।।
मार्गेषु मां रक्षतु नीलकण्ठः शैलादिदुर्गेषु
पुरत्रयारि ।
अरण्यवासादि-महाप्रवासे पायान्मृगव्याध उदार-
शक्तिः ।।
कल्पान्त-काटोप-पटु-प्रकोप-स्फुटाप्रहासोच्च
लिताण्डकोशः ।
घोरारि-मेनार्णव दुर्निवार-महाभयाद् रक्षतु
वीरभद्रः ।।
पत्यश्व-मातङ्ग-रथावरूथ-सहस्र लक्षायुत-कोटि-
भीषणम ।
अक्षौहिणीनां शतमाततायिनाश्छिन्द्या-न्मुडो घोर-
कुठार-धारया ।।
निहन्तु दस्यून् प्रलया-निलार्चिज्ज्वलन् त्रिशूलं
त्रिपुरान्तकस्य ।
शार्दूल-सिहर्क्ष-वृकादिहिंस्रान् सन्त्रासयत्वीश-
धनुः पिनाकः ।।

का शेष भाग )

दुःस्वप्न-दुःशकुन-दुर्गति-दौर्मनस्य-दुर्भिक्ष-दुर्व्यसन-
दुःसह-दुर्यशांसि ।
उत्पात-ताप-विष-भीतिमसद्ग्रहार्ति-व्याधींश्च
नाशयतु मे जगताम-धीशः ॥